"श्लाघा प्रशंसार्थवादः सा तु मिथ्याविकत्थनम् ।"
इति हेमचन्द्रः ॥
( यथा, भागवते । १ । १५ । १६ ।
"शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ॥"
विकत्थते आत्मानमिति । वि+कत्थ+ल्युः ।
आत्मश्लाघाकारिणि, त्रि । यथा, महाभारते ।
२ । ७३ । ३२ ।
"अश्रयितारं हर्त्तारं प्रवक्तारं विकत्थनम् ।
भीमसेननियोगात्ते हन्ताहं कर्णमाहवे ॥")
स्त्री, वि+कत्थ+णिच्+युच् । टाप् । आत्म-
श्लाघा । यथा, विख्यातविजयनाटके । २ ।
"सम्भवोक्तापि शक्तानां न प्रशस्ता विकत्थना ।
शरदीयघनध्वानैर्व्वाचोभिः किं भवादृशाम् ॥")

विकम्पितः, त्रि, विशेषेण कम्पविशिष्टः । विपूर्व्वक-
कम्पधातोः क्तप्रत्ययेन निष्पन्नः ॥

विकरः, पुं, ( विकीर्य्यते हस्तपादादिकमनेनेति ।
वि+कॄ+"ऋदोरप् ।" इत्यप् । ) रोगः ।
इति शब्दचन्द्रिका ॥

विकरालः, त्रि, (विशेषेण करालः । ) भयानकः ।
इति विकटशब्दार्थे मेदिनी ॥ ( यथा, मार्क-
ण्डेये । ११८ । ४८ ।
"विकरालं महावक्त्रमतिभीषणदर्शनम् ।
समुद्यतमहाशूलं प्रभूतमतिदारुणम् ॥")

विकर्णः, पुं, दुर्य्योधनपक्षीयशूरः । यथा,—
"अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ।
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥"
इति भगवद्गीतायाम् १ अध्यायः ॥
( विगतौ कर्णौ यस्येति विग्रहे कर्णरहिते,
त्रि ॥ )

विकर्णिकः, पुं, सारस्वतदेशः । इति हेमचन्द्रः ॥

विकर्त्तनः, पुं, ( विशेषेण कर्त्तनं यस्य । विश्वकर्म्म-
यन्त्रखोदितत्वादस्य तथात्वम् । ) सूर्य्यः । अर्क-
वृक्षः । इत्यमरः ॥

विकर्म्मकृत्, त्रि, ( विकर्म्म विरुद्धं कर्म्म करो-
तीति । कृ+क्विप् ।) निषिद्धकर्म्मकारी । यथा,
"न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ ।
न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥"
इति मानवे । ८ । ६६ ॥
"विकर्म्मकृत् निषिद्धकर्म्मकारी ।" इति कुल्लूक-
भट्टः ॥

विकर्म्मस्थः, त्रि, ( विकर्म्मणि विरुद्धाचारे तिष्ठ-
तीति । स्था+कः । ) निषिद्धकृत् । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान्
शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
(तथा मनौ । ४ । ३० ॥)

विकर्षः पुं, ( विकृष्यतेऽसौ इति । यद्वा, विकृष्यन्ते
परप्राणा अनेनेति । वि+कृष्+घञ् । )
बाणः । इति त्रिकाण्डशेषः ॥ ( वि+कृष+
भावे घञ् । विकर्षणम् ॥ )

विकर्षणं, क्ली, ( वि+कृष+ल्युट् ।) आकर्षणम् ।
विपूर्व्वकृषधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा,
किराते । ३ । ५७ ।
"अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म्मकार्म्मुकम् ॥"
विभागः । यथा, भागवते । ३ । ७ । ३० ।
"वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ।
ऋषीणां जन्मकर्म्माणि वेदस्य च विकर्षणम् ॥")

विकलः, त्रि, ( विगतः कलो व्यक्तध्वनिर्यस्य । )
विह्वलः । इति जटाधरः ॥ स्वभावहीनः । इति
भरतः ॥ (यथा, महाभारते । १ । ४६ । १९ ।
"विधवानाथविकलान् कृपणांश्च बभार सः ।
सुदर्शः सर्व्वभूतानामासीत् सोम इवापरः ॥")

विकलपाणिकः, पुं, ( विकलः पाणिर्यस्य । कन् । )
स्वभावहीनपाणियुक्तः । यथा । कुणिर्विकल-
पाणिकः । इति हलायुधः ॥

विकला, स्त्री, (विगतः कलो मधुरालापो यस्याः ।
ऋतौ तु स्त्रिया मौनित्वविहितत्वात् । ) ऋतु-
हीना । इति शब्दरत्नावली ॥

विकलाङ्गः, त्रि, ( विकलानि अङ्गानि यस्य । )
स्वभावतो न्यूनाङ्गः । तत्पर्य्यायः । अपोगण्डः
२ । इत्यमरः ॥ पोगण्डः ३ अङ्गहीनकः ४ ।
इति शब्दरत्नावली । ( यथा, महाभारते ।
१ । ३१ । ३४ ।
"जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ॥")

विकली, स्त्री, ( विगता कला यस्याः । गौरादि-
त्वात् ङीष् । ) ऋतुहीना । इति शब्दरत्ना-
वली ॥

विकल्पः, पुं, (विरुद्धं कल्पनमिति । वि+
क्लृप+घञ् । ) भ्रान्तिः । ( यथा, देवीभाग-
वते । १ । १६ । ३२ ।
"विकल्पोपहतस्त्वं वै दूरदेशमुपागतः ।
न मे विकल्पसन्देहो निर्व्विकल्पोऽस्मि सर्व्वथा ॥")
कल्पनम् । इति मेदिनी । पे, ॥ ( यथा, भाग-
वते । ५ । १६ । २ ।
"तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः
सप्त सिन्धव उपकॢप्ताः । यत एतस्याः सप्त-
द्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः ॥"
संशयः । यथा, रघुः । १७ । ४६ ।
"रात्रिन्दिवविभागेषु यथादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥"
नानाविधः । यथा, मनुः । ९ । २२८ ।
"प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ॥")
विविधकल्पः । स च द्विविधः । व्यवस्थितः ।
ऐच्छिकश्च । सोऽप्याकाङ्क्षाविरहे युक्तः । तथा
च भविष्ये ।
"स्मृतिशास्त्रे विकल्पस्तु आकाङ्क्षापूरणे सति ॥"
इच्छाविकल्पेऽष्टदोषाः । यथा,—
"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना ।
प्रत्युज्जीवनहानिभ्यां प्रत्येकमष्टदोषता ॥"
व्रीहिभिर्य्यजेत यवैर्य्यजेत इति श्रूयते । तत्र
व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्व्व-
स्मात् पृथक् वाक्यं अन्यथा समुच्चयेऽपि याग-
सिद्धिः स्यात् । अतएव विकल्पे न उभयः
शास्त्रार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपा-
दीयमाने परित्यक्तयवप्रामाण्योज्जीवनं स्वीकृत-
यवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं
व्रीहावपि चत्वारः । इत्यष्टौ दोषा इच्छा-
विकल्पे । तथा चोक्तम् ।
"एवमेवाष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ॥"
इति ॥
एकार्थतया विविधं कल्प्यते इति विकल्पः ।
तस्मादष्टदोषभिया उपोष्य द्वे तिथी इत्यत्र
न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः ।
इत्येकादशीतत्त्वम् ॥ (अवान्तरः कल्पः । यथा,
भागवते । २ । ८ । ११ ।
"यावान् कल्पो विकल्पो वा यथा कालोऽनु-
मीयते ॥"
देवता । यथा, भागवते । १० । ८५ । ११ ।
"वैकारिको विकल्पानां प्रधानमनुशायि-
नाम् ॥"
"विविधं आधिदैवाध्यात्माधिभूतभेदेन कल्प्यन्ते
इति विकल्पा देवास्तेषां कारणं वैकारिकः
सात्त्विकोऽहङ्कारश्च त्वम् ।" इति तट्टीकायां
स्वामी ॥)

विकश्वरः, त्रि, ( वि+कश+वरच् । ) विकाशी ।
इत्यमरटीकायां भरतः ॥ (यथा, नैषधे ।२।५।
"अयमेत्य तड़ागनीड़जै-
र्लघुपर्य्यव्रियताथ शङ्कितैः ।
उदड़ीयत वैकृतात् कर-
ग्रहजादस्य विकस्वरस्वरैः ॥")

विकषा, स्त्री, ( विकषतीति । वि+कष गतौ+
अच् । टाप् । ) मञ्जिष्ठा । इत्यमरटीकायां
रायमुकुटः ॥ मांसरोहिणी । इति राज-
निर्घण्टः ॥

वकस्वरः, त्रि, ( वि+कस+वरच् ।) विकश्वरः ।
इत्यमरटीकायां भरतः ॥

विकसः, पुं, ( विकसतीति । वि+कस+अच् । )
चन्द्रः । इति त्रिकाण्डशेषः ॥

विकसा, स्त्री, ( विकसतीति । वि+कस+अच् ।
टाप् । ) मञ्जिष्ठा । इत्यमरः ॥

विकसितं, त्रि, (वि+कस+क्तः ।) दलानामन्यो-
न्यविश्लेषः । तत्पर्य्यायः । उज्जृम्भितम् २ उज्जृ-
म्भम् ३ स्मितम् ४ उन्मिषितम् ५ विनिद्रम् ६
उन्निद्रम् ७ उन्मीलितम् ८ विजृम्भितम् ९
उद्बुद्धम् १० उद्भिदुरम् ११ भिन्नम् १२ उद्-
भिन्नम् १३ हसितम् १४ विकस्वरम् १५ विक-
चम् १६ व्याकोषम् १७ फुल्लम् १८ संफुल्लम् १९